(आ) द्विकर्मकस्थले कर्मणि प्रयोगः ।

इमानि द्विकर्मकवाक्यानि कर्मणिप्रयोगे (कर्मवाच्ये) एवं प्रयोक्तव्यानि -

कर्तरि प्रयोगः	*कर्मणि प्रयोगः*
१. गोपालः गां पयो दोग्धि ।	१. गोपालेन गौः पयः दुह्यते ।
२. वामनः बलिं वसुधां याचते ।	२. वामनेन बलिः वसुधां यच्यते ।
३. पाचकः तण्डुलान् ओदनं पचति ।	३. पाचकेन तण्डुलाः ओदनं पच्यते ।
४. राजा गर्गान् शतं दण्डयति ।	४. राज्ञा गर्गाः शतं दण्ड्यते ।
५. गोपः गां व्रजम् अवरुणद्धि ।	५. गोपेन गां व्रजः अवरुध्यते ।
६. पान्थः माणवकं पन्थानं पृच्छति ।	६. पान्थेन माणवकः पन्थानं पृच्छ्यते ।
७. वटुः वृक्षं फलानि अवचिनोति ।	७. वटुना वृक्षः फलानि अवचीयते ।
८. पिता माणवकं धर्मं ब्रूते ।	८. पित्रा माणवकः धर्मं उच्यते ।
९. गुरुः माणवकं धर्मं शास्ति ।	९. गुरुणा माणवकः धर्मं शास्यते ।
१०. चैत्रः देवदत्तं शतं जयति ।	१०. चैत्रेण देवदत्तः शतं जीयते ।
११. सुरासुरगणः सुधां क्षीरनिधिं मथ्नाति ।	११. सुरासुरगणेन सुधां क्षीरनिधिः मथ्यते ।
१२. चैत्रः देवदत्तं शतं मुष्णाति ।	१२. चैत्रेण देवदत्तः शतं मुष्यते ।
१३. कृषिकः ग्रामम् अजां नयति ।	१३. कृषिकेण ग्रामम् अजा नीयते ।
१४. गोपः वृषभं गोष्ठं हरति ।	१४. गोपेन वृषभः गोष्ठं ह्रियते ।
१५. गोपः गोवत्सं गाष्ठं कर्षति ।	१५. गोपेन गोवत्सः गाष्ठं कृष्यते ।
१६. कृषिकः अजापुत्रं नगरं वहति ।	१६. कृषिकेण अजापुत्रः नगरं उह्यते ।

'दुह्यते' इत्यारभ्यः 'मुष्यते' इत्यन्तं यावत् गौणे कर्मणि लकारः कृतः । अतो गौणकर्मणः अभिधानात् गौणकर्मणो न द्वितीया, अपि तु प्रथमा । 'नीयते इत्यारभ्य उह्यते' इत्यन्तं यावत् प्रधाने कर्मणि लकारः कृतः । अतः प्रधान कर्मणः अभिधानात् प्रधानकर्मणः परा द्वितीया न, अपि तु प्रथमा ।

अत्र दुहादयोः द्वादशधातवः । तेषाम् एकः गणः । नीहृकृश्वहाश्चत्वारो धातवः । तेषाम् अपरः गणः । दुहदीनां गौणे कर्मणि लकारः । नीहृकृश्वहां प्रधाने कर्मणि लकारः इति विवेकः । **''गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृश्वहाम्''** इति वचनम् अत्र प्रमाणम् ।